# Rashtradhvajagitam

# રાષ્ટ્રધ્વજગીતમ્

## Document Information

Text title : Rashtradhvajagitam

File name : rAShTradhvajagItam.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# રાષ્ટ્રધ્વજગીતમ્

(ગીતિકા) (માત્રાસમક જાતિ)
જયતિ ત્રિવર્ણે ગુણગણપૂર્ણે
    જગતિ સમિદ્ધ સુષમાઽઽકીર્ણમ્ ।
સ્નેહ-સૌખ્ય-રસ ગૌરવ-માનં
    ધૃતિ-મતિ શક્તિ-સુધૌઘ-નિધાનમ્ ॥ જયતિ૦ ॥

વિશ્વ શાન્તિ હિત-કૃત સન્દેશ
    ભ્રાતૃભાવ સમતૈક નિદેશમ્ ।
ચારુ ચરિત કૃત-જન-સન્તોષં
    આધિ-વ્યાધિ ભય-શોષણ શોષમ્ ॥ જયતિ૦ ॥

વીર કેતુરયમુચ્છ્રિન-દણ્ડ
    શૌર્ય પ્રધર્ષિત રિપુ દલ ખણ્ડ ।
શત્રુ સૈન્ય દલનેન પ્રચણ્ડ
    ક્રાન્તિકારિ ચરિતામૃત ચણ્ડ ॥ જયતિ૦ ॥

ધ્વજમિમમુન્નય, માતરમર્ચય,
    અઞ્જય દેશહિતાર્પિત-જીવમ્ ।
ભઞ્જય શત્રુ, રઞ્જય મિત્ર
    મણ્ડય દેશ, ખણ્ડય દ્વેષમ્ ॥ જયતિ૦ ॥

કૈસર શ્વેત-હરિત-ગુણપૂર્ણે
    વર્ણૈર્ભ્રાજિત-રુચિર-સુશોભમ્ ।
કૈસર-વર્ણિત ત્યાગ-તપોબલ
    શૌર્ય ધૈર્ય-ગરિમોચ્ચય-પૂર્ણમ્ ॥ જયતિ૦ ॥

શ્વેત-વર્ણ-ધૃત-શમ-સન્તોષ
    સત્ય-અહિંસા-શાન્તિ-ગુણૌઘમ્ ।
હરિત-વર્ણ-શ્રિત-વૈભવ ભાવં

ઉન્નતિ-પ્રગતિ વિકાસ ગુણાઢ્યમ્ ॥ જયતિ૦ ॥

ધર્મ-ચક્ર-સંસૂચિત ધર્મં
ધર્મં-નય ધર્માર્પિત દેહમ્ ।
પ્રગતિ-સૂચક ચક્રમિદં તે
સૂર્ય-ચક્રમિવ હાસ વિકાસમ્ ॥ જયતિ૦ ॥

લોક-હિતાય જગદ્ધિત હૈતો
ભ્રાતૃભાવ સમતા-સુખ-હેતો ।
પ્રગતિ વિકાસ-સમુન્નતિ-હેતો
વિલસેદ્ રાષ્ટ્રધ્વજ સુખ સેતુ ॥ જયતિ૦ ॥

ક્રાન્તિકારિભિર્જીવન-દાનૈઃ
શાન્તિ-પથૈઃ સર્વસ્વ પ્રદાનૈઃ ।
વીર ધીર-જન-જીવન ત્યાગૈઃ,
અર્ચિતમેતત્ પ્રતિપલ રમ્યમ્ ॥ જયતિ૦ ॥

ક્રાન્તિ શૌર્ય ધૃતિ-જીવન-દાન
શિક્ષય લોક, શોષય શોકમ્ ।
ષષ્ટિ-કોટિ-જય-નાદ-સમુર્ત્યમ્ ।
વિહરેદ્ વિલસેદ્ ગૌરવ-પૂર્ણમ્ ॥ જયતિ૦ ॥

Proofread by Mandar Mali

*Rashtradhvajagitam*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*